संस्कृत-वार्ता:

24.03.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमणेन उक्तं यत् उपयुक्तैः, समये नीतिनिर्णयैः आर्थिकसुधारैः च भारत-देशः कोविड-संकटात् बहिरागतः।
- केन्द्रसर्वकारेण अग्रिम-आदेशपर्यन्तं पलाण्डुनिर्यातप्रतिबन्धः विस्तारितो वर्तते ।
- जम्मू-कश्मीरे सुरक्षाबलेन श्रीनगरे निषिद्ध-आतङ्कवादी-सङ्घटनस्य जैश-ए-मोहम्मद इत्यस्य आतङ्कवादी-गतिविधेः मूलोत्पाटनम्, चतुर्णाम् आततायिनां निगडनं च विहितम्।
- मास्को-नगरे आतङ्कवादिनां आक्रमणे मृतकानां संख्या त्रयस्त्रिंशदुत्तर-एकशतम् अभवत्।
- फीफा इत्यनेन जापान-उत्तरकोरिया देशयोः मध्ये मंगलवासरे प्योंगयांग नगरे सम्भावित-निर्णायक-द्वन्द्वं निरस्तीकृतम्।

<u>निर्मला सीतारमण:-</u>

केन्द्रीय-वित्तमन्त्रिणा निर्मला-सीतारमणेन उक्तं यत् उपयुक्तैः, समये नीतिनिर्णयैः आर्थिकसुधारैः च भारत-देशः कोविड-संकटात् बहिरागतः। अद्य बेङ्गलूरुनगरे विचारकमञ्चस्य सत्रं सम्बोधयन्ती सा अवदत् यत् अद्य वैश्विकसमुदायः भारतस्य आपत्कालीन-भूमिकायाः कृते द्रुतगत्यां वर्धमानायाः अर्थव्यवस्थायाः कृते च प्रशंसां कुर्वन् अस्ति । विंशत्यधिक-द्विसहस्र-तम-वर्षात् द्वाविंशत्यधिक-द्विसहस्र-तम-वर्षं यावत् कोविड् ततः परं रूस-युक्रेन-देशयोः युद्धेन सम्पूर्णे विश्वे आर्थिकसंकटः अभवत् । परञ्च

भारतेन निर्धनेभ्यः खाद्यान्नं प्रदत्तम्, एमएसएमई-संस्थानां कृते सहयोगः प्रदत्तः, आर्थिकसुधारेण व्यवस्था पारदर्शिता, व्यापारे सुगमता च आगता।

पलाण्डु – केन्द्रसर्वकारः

केन्द्रसर्वकारेण अग्रिम-आदेशपर्यन्तं पलाण्डुनिर्यातप्रतिबन्धः विस्तारितो वर्तते । अन्तर्देशीय-उपलब्धतां वर्धयितुं पलाण्डु-मूल्यस्य नियन्त्रणाय च एषः निर्णयः कृतः अस्ति । विदेश-व्यापार-महानिदेशालयेन अधिसूचनायां उक्तं यत् पलाण्डु-निर्यातप्रतिबन्धः ऐषमः मार्चमासस्य एकत्रिंशं यावत् स्थापितः आसीत् अधुना अग्रिम-आदेशपर्यन्तं तस्य विस्तारः क्रियते। गतवर्षस्य डिसेम्बरमासे सर्वकारेण पलाण्डु-निर्याते प्रतिबन्धः कृतः आसीत् । परन्तु मित्रदेशेभ्यः पलाण्डु-निर्यातस्य अनुमतिः प्रकरणान्तरेण कृता वर्तते ।

जम्मू-कश्मीरः-आतंकवदी-गतिविधिः

जम्मू-कश्मीरे सुरक्षाबलेन श्रीनगरे चतुर्णां आतङ्कवादिनांसहकारिणां निगडनं कृत्वा निषिद्ध-आतङ्कवादी-सङ्घटनेन जैश-ए-मोहम्मद (जेएम) इत्यनेन सह सम्बद्धंप्रमुख-आतङ्कवादी-गतिविधेः मूलोत्पाटनं कृतम् अस्ति। विशिष्टसूचनया कार्यं कृत्वा नावगाम-पुलिसंस्थानस्यअधिकारक्षेत्रे केनिहामाक्षेत्रे श्रीनगर-आरक्षिदलम्, पञ्चाशत्-राष्ट्रीय-राइफल्स्, वैली क्यूआरटी, ऊनविंश-बटालियन सीमा-सुरक्षा-बलैः च समाविष्टं संयुक्तं चलवाहन-निरीक्षण-स्थलं स्थापितमासीत् । निरीक्षण-काले संयुक्तपक्षेण एकं यानम् अवरुद्ध्य चत्वारः आतङ्कवादिनः गृहीताः। प्रारम्भिक अन्वेषणस्य समये ज्ञातं यत् गृहीताः आतंकवादिनः निषिद्ध-आतङ्कवादी संगठनेन जैश-ए-मोहम्मद इत्यनेन सह सम्बद्धाः सन्ति। तेषां विरुद्धं नावगामस्य आरक्षि-स्थात्रे प्रासंगिकखण्डानां अन्तर्गतं प्रकरणं पंजीकृतमस्ति, अग्रे अन्वेषणं प्रचलति।

मास्को-आतंकी-आघातः

मास्कोनगरस्य क्रोकस्-नगरभवने आतङ्कवादिनां आक्रमणे मृतकानां संख्या त्रयस्त्रिंशदुत्तर-एकशतम् अभवत्। रूसदेशस्य अन्वेषणसमितेः उद्धरणं कृत्वा रूसीराज्यमाध्यमेन तास् इत्यनेन उक्तं यत् अन्वेषणं प्रचलति, संगीतभवनात् मलिनावशेषस्य च निष्कासनं प्रचलति । रूसस्यस्वास्थ्यमन्त्रालयस्य अनुसारं सप्तचत्वारिंशदुत्तर-एकशतंजनाः घातिताः अभवन् । रूसदेशेन उक्तं यत् चतुर्भिः भुशण्डीधारकैः सह एकादश-जनाः गृहीताः। अत्र भारते रूस-दूतावासेन आतङ्कवादीनाम् आक्रमणस्य पीडितानां परिवारेभ्यः शोकं प्रकटयितुं जनानां कृते अन्तर्जालीय-शोकपुस्तकम् आरब्धम् अस्ति। अस्मिन् अन्तर्जाल-पुस्तके जनाः स्वस्य शोकसन्देशं वा मृतकं प्रति स्वस्य समर्थनं सहानुभूतिञ्च टिप्पणीविभागे लिखितुं शक्नुवन्ति। क्राकस्-नगरस्य सभागृहे आतङ्कवादीनां आक्रमणस्य उत्तरदायित्वं इस्लामिक स्टेट् खोरासान इति आतङ्कवादीसङ्गठनेन स्वीकृतम् अस्ति । रूसस्य सुरक्षासेवायाः कथनानुसारं आक्रमणकारिणः युक्रेनदेश-सम्बद्धाः आसन्, अतः ते समीपस्थं देशं युक्रेनदेशं प्रति पलायनं

कुर्वन्तः आसन् । युक्रेनदेशेन आक्रमणे स्वस्य संलग्नतायाः आरोपाः लज्जाजनकाः इति वर्णिताः। इदानीं अमेरिकादेशेन उक्तं यत् इस्लामिक स्टेट् खोरासान इत्यस्य कथनं विश्वसनीयमस्ति तथा च युक्रेनदेशः अस्य आक्रमणस्य उत्तरदायी नास्ति इति विश्वसिति ।

भाजपा

पूर्व-भारतीय-वायुसेना-प्रमुखः आर. भदौरिया अथ आन्ध्रप्रदेशस्य युवाजन-श्रामिका-रैतु-कांग्रेस-पार्टी वाई.एस.आर.सी.पी इति दलस्य पूर्वसांसदः वरप्रसादराव- वेलागापल्ली अद्य नवीदिल्लीनगरे भाजपा महासचिव- विनोद तावडेवर्यस्य केन्द्रीयमन्त्रिणः अनुरागसिंह-ठाकुरस्य च उपस्थितौ भारतीयजनतापक्षे सम्मिलितवन्तौ।

पाकिस्तान-भारतव्यापारसम्बन्धाः-

पाकिस्तानस्य विदेशमन्त्री-मुहम्मद-इशाक-डारः अवदत् यत्तस्य देशः भारतेन सह व्यापारसम्बन्धं पुनः संस्थापनायगभीरेण विचारयिष्यति यत् ऊनविंशत्यधिक-द्विसहस्रतम वर्षस्य अगस्त मासात् एव स्थगितम् आसीत् । श्री डारः लंदननगरे वार्ताहरानाम् सम्मेलने अवदत् यत् पाकिस्तानदेशीयाः उद्यमिनः भारतेन सह व्यापारं पुनरावर्तितुम् इच्छन्ति । तस्य वचनेन भारतस्य प्रति पाकिस्तानस्य कूटनीतिकदृष्टिकोणे सम्भाव्यपरिवर्तनस्य संकेतो दृश्यते। ध्येयं वर्तते यत् भारतसर्वकारेण सप्तत्यधिक त्रिशतम् इति अनुच्छेदस्य अपसारणानन्तरं जम्मू-कश्मीरं केंद्रशासित-राज्ययोः रूपे विभाजनानन्तरं च

इस्लामाबादेन नवदिल्ल्या सह राजनयिकसम्बन्धाः न्यूनीकृताः आसन् । नवदिल्ल्या पाकिस्तानदेशं प्रति स्पष्टीकृतं यत् जम्मू-कश्मीर-लद्दाखयोः सम्पूर्ण-केन्द्रशासितप्रभागाः भारतस्य अभिन्नाः अविच्छिन्नाः च भागाः सन्ति । नवीदिल्ल्या एतदपि प्रतिपादितं यत् भारतसर्वकारेण जम्मू-कश्मीरस्य केन्द्रीयक्षेत्रे सामाजिक-आर्थिक-विकासं सुशासनं च सुनिश्चेतुं क्रियमाणाः संवैधानिक निर्णयाः उपायाश्च अस्माकं निज-विषयाःसन्ति।

विश्व-क्षयरोग-दिवसः

अद्य विश्व-क्षयरोग-दिवसः । यदा प्रथमवारं क्षयरोगजनकजीवाणुः आविष्कृतः तस्य दिवसस्य वार्षिकोत्सवः मार्चमासस्य चतुर्विंशे दिनांके भवति । प्रतिवर्षम् अस्मिन् दिने संपूर्ण-विश्वे क्षयरोगदिवसः आचर्यते यस्य उद्देश्यं क्षयरोगः, तस्य प्रसारं कथं निवारयितुं शक्यते इति च नजागरूकतायाः वर्धनम् । क्षयरोगः माइकोबैक्टीरियम ट्यूबरकुलोसिस् जीवाणुजन्यःतथा च शरीरे फुफ्फुसाः सर्वाधिकं प्रभाविताः अङ्गाः सन्ति । क्षयरोगः शरीरस्य अन्येषु भागेषु यथा वृक्कं, मेरुदण्डं, मस्तिष्कं च प्रभावितं कर्तुं शक्नोति । दुर्बलप्रतिरक्षातन्त्रं, मधुमेहः, कुपोषणं, तम्बाकू-उपयोगः च इत्यादयः कारकाः क्षयरोगं वर्धयितुं शक्नुवन्ति । द्व्यशीत्यधिक-आष्टादश-

शततमे वर्षे अस्मिन् दिने डॉ. रोबर्ट् कोच् इत्यनेन क्षयरोगस्य उत्तरदायी जीवाणुः माइकोबैक्टीरियम ट्यूबरकुलोसिस् इति चिह्नितः । प्रथमः विश्वक्षयरोगदिवसः त्र्यशीत्यधिक-नवदश-शततमे वर्षे आधिकारिकतया आचरितः, ततः परम् अयं वार्षिकः कार्यक्रमःअभवत् ।

आई.पी.एल्

आई.पी.एल् इत्यस्य क्रिकेट-मालिका-प्रतिस्पर्धायां राजस्थान-रायल्स् इत्यनेन दलेन लखनऊ-सूपर्-जायंट्स् इत्येतं दलं विरुद्ध्य चतुस्तोभानां हानिपुरस्सरं सप्तसप्तत्यधिक-एकशतधावनांकानां लक्ष्यं समुपस्थापितम् । तत्रैव द्वितीया प्रतिस्पर्धा गुजरात-टाइटन्स्-मुम्बई-इण्डियन्स् इत्येतयोः दलयोः मध्ये अहमदाबादस्य नरेन्द्रमोदि-क्रीडांगणे सार्ध-सप्तवादने भविष्यति ।

फीफा

फीफा इति अन्ताराष्ट्रिय-पादकन्दुक-महासंघेन जापान-उत्तरकोरिया देशयोः मध्ये मंगलवासरे प्योंगयांग नगरे सम्भावित-निर्णायक-द्वन्द्वं निरस्तीकृतम्। फीफा इत्यनेन शनिवासरे स्वकीयान्तर्जाल-पटले ख्यापितं यत् उत्तरकोरिया-देशेन पुष्टीकृत-वैकल्पिक-तिथिस्थानयोःअभावे निर्णयोऽयं स्वीकृतः वर्तते ।

।। इति वार्ता: ।।